International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 219-221
© 2023 IJSR
www.anantaajournal.com
Received: 01-12-2022
Accepted: 06-01-2023

**दिननाथशर्मा**
सहायकाचार्यः, व्याकरणविभागः, सरकारी-संस्कृत-महाविद्यालयः, साम्दोङ सिक्किमः, भारत

Corresponding Author:
दिननाथशर्मा
सहायकाचार्यः, व्याकरणविभागः, सरकारी-संस्कृत-महाविद्यालयः, साम्दोङ सिक्किमः, भारत

# तुल्यास्यप्रयत्नं सवर्णम् – एकमध्ययनम्

**दिननाथशर्मा**

**सारांश**
तुल्यास्यप्रयत्नं सवर्णमिति सूत्रस्य कोऽभिप्रायः। अनेन स्थानस्य प्रकल्पना कथं विहिता आसीदिति विषयेऽस्मिन् शोधलेखने प्रस्तूयते। प्रथमतः सूत्रस्य कोऽर्थः कस्माद्धातोः शब्दानां निष्पत्तिर्जायते इत्यस्मिन् विषये प्रतिभाति। तुल उन्माने इत्यस्मात्धातो नौर्वयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्य-प्राप्यवध्यानाम्यसमसमितसंमितेषु ४-४-९१[1] इति सूत्रेण तुल्यार्थे यत् प्रत्यये तुल्यः शब्दो निष्पद्यते। समानः सादृश्यार्थो वास्य। परमत्र केन सह तुल्य इत्याकांक्षायां येषां वर्णानां समुच्चारणकाले आस्येन सह तुल्यो भवति तेषां वर्णानां सवर्णत्वमुपबोधो जायते। अथवा ताल्वाद्युच्चारणस्थानन्तथा आभ्यान्तरप्रयत्नस्याभेदेन सम्बन्धो भवति तेषां वर्णानामेव सवर्णसंज्ञेति ज्ञायते।

**कूटशब्दः** आस्य, निकारोपस्कारः, ओभावः, विवृतावेङौ, कङयोः, अक्षु, एकशेषनिर्देशः

## प्रस्तावना

सूत्रे आस्यशब्देन किं ज्ञायते? दिवादिगणपठित्वात् असु क्षेपणे इति धातोः ण्यत् प्रत्यये आस्यशब्दो निष्पद्यते अस्यार्थ अस्यन्त्यनेन वर्णान् इति आस्यमिति भवति अर्थाद् यस्य साहाय्येन वर्णा बहिः प्रक्षिप्यन्ते तदास्यम्। परन्तु आङ् पूर्वकात् स्यन्द् धातोः डप्रत्यये विधीयमान आस्यशब्द अन्नमेतदास्यन्दत इति आस्यमित्याचक्षते। अनेनान्नं यस्य साहाय्येन द्रवीभूतो भवति तदास्यम्। सूत्रे वर्णा प्रक्षिप्यमाणमास्यमेव प्राबल्यत्वेनाङ्गी क्रियते।

ननु लोके प्रसिद्धमुखमर्थयुक्तम् आस्येति शब्दः प्रयुज्यते तर्हि आस्यशब्दस्य प्रयोजनं वैयार्थमापद्यते, ये खलु शब्दाः व्यवहारे प्रयुज्यन्ते तेषामभिव्यक्तिः मुखेऽव भवति, अतः प्रयुज्यमाना वर्णाः तुल्यास्यैव। इत्याशङ्कायां प्रयत्नशब्दस्य विशेषणार्थं सूत्रे आस्यशब्दस्य ग्रहणं विहितम्। यथा- जबगडदश् इति माहेश्वरसूत्रे बाह्यप्रयत्नसाम्यत्वेन सवर्णत्वम् उपबुद्ध्यते यथा- जबगडदानां बाह्यप्रयत्ने संवादनादघोषाऽल्पप्राणप्रयत्नसाम्यत्वम्, प्रयत्नाभिन्नत्वे भिन्नदेशीयशब्दानां सवर्णत्वं जायते। अत आस्ये तुल्यप्रदेशप्रयत्नं सवर्णमिति नियमेन कङयोः चञयोः सवर्णत्वाभावः अतोऽत्रास्य शब्दस्याप्यावश्यको जातः।

अत्र प्रयत्नशब्दे प्रयतनम्, प्रकृष्टो यत्नो वा प्रयत्नः प्रपूर्वकात् यत निकारोपस्कारयोः इत्यस्माद्धातोः यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ् ३-३-९० इत्यनेन यत् प्रत्यये प्रयत्नशब्दो निष्पद्यते। सूत्रेऽस्मिन् अस्येति शब्देन मुखाभ्यान्तरस्थितानां स्थानानां संज्ञेति। तत्रस्थितानां ताल्वादिस्थानमाभ्यान्तरप्रयत्नयुक्तानां वर्णानां सवर्णं जायते।

अस्य विग्रहावसरे महाभाष्ये महर्षिपतञ्जलिना प्रोक्तम् – तुलया संमितं तुल्यम्, आस्यं च प्रयत्नश्च आस्यप्रयत्नम्, तुल्यास्यं च तुल्यप्रयत्नं च सवर्णसंज्ञं भवति।[2] शास्त्रे समेषां वर्णानां स्थानान्युक्तानि, व्यवहारकाले येषां स्थानानां साहाय्येन वर्णाः बहिर्निष्काश्यन्ते ते वर्णाः तस्यैव स्थानयुक्ता भवन्ति। यथा- अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालुः इत्यादयः। कानि च पुनरेतेषां वर्णानां स्थानानि परिकल्पितानीति विषये संस्कृतव्याकरणे अष्टेव मन्यन्ते। स्वशिक्षायां महर्षिपाणिनिना प्रोक्तम्-

> अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
> जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च॥[3]

विसर्गस्य ओकारभावः, विवृत्तिः, शकारभावः, षकारभावः, सकारभावः, रेफभावः, जिह्वामूलीयभावः, उपध्मानीयभावश्चेति अष्टविधा परिणतिर्भवति। उक्तमपि-

> ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
> जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।[4]।

एवं स्थानपरिकल्पना व्याकरणशास्त्रं व्यपोहति । ओकारादयो वर्णाः विसर्गस्य विपरिणामत्वेन कथ्यन्ते, यथा- रामः चिनोतीत्यत्र विसर्गस्य स्तोः श्चुना श्चुः ८-४-४० इति सूत्रेण चकारयोगे विसर्गस्य श्चुत्वे रामश्चिनोति रूपं सिद्ध्यति। एवम् अन्येषु स्थानेष्वपि परिकल्पनीयम्।

ननु व्यावहारकाले आदौ कण्ठस्थानस्योपबोधो जायते परं ताल्वादिस्थानमाभ्यान्तरेत्यादिप्रकारेण तालुशब्दस्याद्योच्चारणमङ्गीक्रियते, अस्यार्थो भवति यत् तालुस्थानमेवादौ प्रवर्तते, कौमुद्यान्तु कण्ठस्थानस्य प्रथमप्रयोगो विहितो वर्तते, अतः ताल्वादिशब्दो वैयार्थमिति । परमत्र व्याख्यानावसरे – तालुन आदिस्ताल्वादिः (कण्ठः) तालु आदिर्येषान्तानीमानि ताल्वादीनि, ताल्वादिश्च ताल्वादीनि चेति एकशेषः अनेन प्रकारेण विग्रहे सति कण्ठस्थानस्य आदौ ग्रहणम्। अत एव – ताल्वादिस्थानमाभ्यान्तप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं भवतीति। यदि वर्णानां स्थानसाम्ये सति सवर्णसंज्ञा जायते चेत्पाणिनीयाष्टाध्याय्यां यजुष्येकेषाम् ८-३-१०४ इति सूत्रे यजुषि एकेषामित्यादौ इकार एकारयोर्मध्ये सवर्णसंज्ञा भवितव्या। शब्देऽस्मिन् कथम् इको यणचि इत्यनेन यणादेशो विधीयते ? इत्याकांक्षायामत्र एकारस्य न केवलं तालुस्थानमेव वर्तते, वर्णोऽयं कण्ठतालुस्थानयुक्तो भवति, अत सवर्णत्वन्न।

एवं स्मर्तव्यं यत् इ ए इत्यादौ तु स्थानभिन्नत्वे सति सवर्णसंज्ञा नैव, परं ए ऐ, ओ औ इत्येतेषां वर्णानां स्थानसाम्यत्वे सति कथं सवर्णत्वं नैव जायते इति शङ्कायां महर्षिपाणिनिना माहेश्वरसूत्रे एओङ्, ऐऔच् एतेषां वर्णानां पृथक् सूत्ररूपेणोच्चारणं विहितम्, छन्दोवत् सूत्राणि भवन्तीति न्याय्येन ए ऐ, ओ औ इत्यत्र सवर्णत्वं नैव दरीदृश्यते। अपरमप्यस्य निराकरणं क्रियते यत् एकार ओकारश्च विवृततरौ ऐकार औकारश्च विवृततमौ प्रयत्नभेदौ स्तः, अतश्च नैतेषां वर्णानां सवर्णत्वम्।

ननु सर्वे वर्णाः आस्यादेव प्रयुज्यन्ते परमत्र कथं भिन्नस्थानानि प्रकल्प्यन्ते ? अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालुः, ऋटुरषाणां मूर्द्धा, लृतुलसानां दन्ताः, उपूपध्मानीयानामोष्ठौ, ञमङणनानां नासिका चेत्यादयः। अत्र व्यावहारकाले यत् स्थानमाहत्य समुच्चार्यन्ते ते वर्णाः तत्स्थानिका इति मन्यन्ते । पुनरत्रेका शङ्का समुद्भूयते यत् यदि वर्णानां स्थानसाम्यत्वे सवर्णत्वोपबोधो जायते तर्हि दधि शीतलम्, मातृ षोडषः, अकारहकारयोः, लृकारसकारयोरित्यत्र कथं सवर्णत्वन्न? इत्याशङ्कायां पाणिनिनास्मिनन्नापत्तौ नाज्झलौ १-१-१० इति सूत्रमुल्लिखितम् । अकारसहितोऽच् आच्, स च हल् चेत्येतौ मिथः सवर्णौ न स्तः।[5] इति नियमेन अचो हल्सु, हल अक्षु सवर्णत्वं नैव।

सूत्रे अपरशङ्कापि दृश्यते यद् ह्रस्वदीर्घप्लुतः, उदात्तानुदात्तस्वरितानुनासिकान-नुसासिकभेदेन ऋकारस्याष्टादश दीर्घत्वाभावेन लृकारस्य द्वादशभेदाः प्रकीर्तिता परमत्र उरण् रपरः १-१-५१ इत्यत्र ऋ इति त्रिंशतः संज्ञेत्युक्तम् तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते[6] इत्यकथयत्, परन्तु ऋकारलृकारयोः स्थानभिन्नत्वे सत्यपि कथं सवर्ण भवति? कौमुद्यां तु लृतुलसानां दन्ताः, ऋटुरषाणां मूर्द्धा इत्यत्र मूर्द्धादन्तयोर्मध्ये स्थानसाम्यत्वन्न, यत्त्वत्र कात्यायनेनास्य निराकरणम् ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्[7] इति वार्तिकमाध्यमेन प्रदत्तम्। उरण् रपर इति प्राबल्येनानयोर्मध्ये सवर्णत्वमपेक्षते । यदि अनयोः नैव सवर्णत्वमुपबुद्ध्यते तर्हि रप्रत्याहारोऽपि वैयर्थ्यमापद्यते।

ननु सूत्रं कथयति यद् वर्णानां स्थानप्रयत्नसाम्यत्वे सति सवर्णत्वमुपबुद्ध्यते इति, परन्तु दण्ड आढकमित्यादौ डकारोत्तरवर्ती अकारस्तथा आढकमित्यादौ आकार इत्यनयोर्मध्ये स्थानप्रयत्नसाम्येऽपि अकः सवर्णे दीर्घः इति सूत्रेण सवर्णत्वं किन्न जायते ? यत्तु दीक्षितेन प्रयुक्तस्य ह्रस्व अवर्णस्य- ह्रस्वास्य वर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु विवृतमेव इत्यकथयत्। अत्र डकारोत्तरवर्ती प्रक्रियाकारस्य विवृतप्रयत्नयुक्तमाढकेन सह प्रयत्नभिन्नत्वे सति सवर्णत्वन्न। अत एव अ अ ६-४-६८ इति सूत्रेऽपि विवृतसंवृतभेदेन सवर्ण संज्ञा नैव जायते, शेखरे नागेशः कथयति- तस्य प्रयोगे संवृतत्वे मानमाह – अ अ प्रयत्नभेदाद्दीर्घाभावः। अत्रोद्देश्यं सवर्णग्रहणं जातिनिर्देशो वा न।[8] अत्र ब्रूमः यथोद्देशपक्षे सवर्णग्रहणन्न, किन्तु कार्यकालपक्षे यदा अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रं अ अ सूत्रदेशमागत्य तद्देशीयं भवति तदा तु अ अ इति सूत्रस्यासिद्धत्वाभावे सवर्णग्रहणं कर्तव्यम्? इत्याशङ्कायां कार्यकालपक्षेऽप्युद्देश्यपूर्व अकार स्वसवर्णग्रहणं नैव करोति कारणं यदस्ति अ अ इत्यादौ अत् अ एवं प्रकारस्य लुप्तषष्ठ्यन्ततपरनिर्देशेनैकमात्राकालिकह्स्वाकारं संवृतत्वमुपबुध्यते। एवं परिणम्यतेऽत्र दीर्घप्लुतयोरकारयोः संवृतसंज्ञा नैव जायते। अत एव संवृतविवृतत्वेनात्रसवर्णग्रहणन्न भवति। विषयेऽस्मिन् नागेशः 'एकशेषनिर्देशाद्वा सिद्धेः' इत्यकथयत्।

कादयो मावसानाः स्पर्शाः। अत्र लौकिकक्रमाश्रयणं विहितम्, यदिदानीन्तनकालेऽपि स्पर्शत्वे प्रसिद्धम् । प्रत्याहारसूत्रे कादयो मावसाना इत्यसम्भवम्, अतः कुचुटुतुपुवर्गत्वेनाक्षिप्यते। स्पर्शत्ववर्णाः तत्तत्देशमाहत्य बहिर्निष्काश्यन्ते । सिद्धान्तकौमुद्यां यणोऽन्तस्थः इत्यकथयत्। अन्तस्थ इत्यनेन स्वरव्यञ्जनयोर्मध्ये समुच्चार्यमाणो वर्णाः अन्तस्थाः, अतो य्, व्, र्, ल् इत्येतेषां वर्णानां इको यणचि, इग्यणः सम्प्रसारणम् इत्यादि प्रत्याहारसूत्रेष्वधीते। ये खल्वर्धस्वराः अर्धश्च व्यञ्जनाः। शास्त्रे बाह्याभ्यान्तरयोर्भेदेन प्रयत्नद्विविधः। सिद्धान्तकौमुद्यान्त्वाभ्यान्तरस्पृष्टेषत्स्पृष्ट-विवृतसंवृतभेदेन चतुर्धा सन्ति। परं लघुकौमुद्यामिषद्विवृतभेदेनोष्मसंज्ञकाः वर्णाः प्रयुज्यन्ते । विवारसंवारादिभेदेन बाह्यप्रयत्नैकादशधा । अथोऽत्रैवं ज्ञायते यद्बाह्याभ्यान्तरस्थानयुक्तवर्ण एव सवर्णयुक्त इति । यमादीनां कथं प्रयोजनम् कुत्र वा च कर्तव्यमिति विषये कौमुदी प्रतिपादयति–

खयां यमाः खयः ᳲक ᳲपौ विसर्गः शर एव च।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते।
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः।।[9]

वर्गेष्वाद्यानां वर्णचतुर्णां पञ्चम ङ् ञ् ण् न् म् परे तत्पूर्वस्थानसदृशो वर्णो यमो नाम । यथा– पलिक्क्नी, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्येतेषु शब्देषु पञ्चमवर्णो नकारपरे तत्पूर्व कखगघादिवर्णाः यमा इति। जिह्वामूलीयोपध्मानीयवर्णाः कुप्वो ᳲक ᳲपौ च ८-३-३७ इति सूत्रे नॄँᳲ पाहि इत्युदाहरणसहित कवर्गे पवर्गे च परे विसर्गस्य ᳲक ᳲपौ स्तः इत्यकथयत्।

## उपसंहार

तुल्यास्यप्रयत्नं सवर्णमिति सूत्रे व्याकरणशास्त्रे प्रयुज्यमानानां वर्णानां स्थानप्रयत्नादिभेदेन सुप्रयुक्तं प्रयोजनं विहितम् । येषां वर्णानां स्थानप्रयत्नादिभेदेन साम्यत्वं भवति तेषां वर्णानां सवर्णसंज्ञा निश्चप्रचम्। यदि स्थानसाम्येऽपि प्रयत्नःसवर्णो भवति तर्हि तस्य सवर्णत्वन्न । पाणिनीयशास्त्रे च वर्णस्याधिकं प्रयुक्तं वर्तते, यस्य भाव अनुवृतित्वेवाङ्गीक्रियते। यथा- ञमङणनानां नासिका च इत्यत्र चकारेण तत्तत्स्थानीयवर्णा अपि ज्ञायन्ते, यमरमनमातां सक् च इत्यत्र अग्लासीदिति प्रयोगे सिचः सम्भवति इडागमोऽपि । अत एव व्याकरणशास्त्रे तुल्यास्यप्रयत्नं सवर्णमिति सूत्रेण सर्वशास्त्रोपकारकमिति प्रतिभाति।

## सन्दर्भ


1. पाणिनिविरचिता, अष्टाध्यायी, ४-४-९१, सम्पादक प्रो. गोपालदत्तपाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी संस्करण ई. २९२१, पृ. ४९
2. महर्षि पतञ्जलि, महाभाष्यम् चतुर्थमाह्निकम्, पृ. ३५६, आचार्यमधुसूदनप्रसादमिश्रप्रणीतया प्रकाश-हिन्दीव्याख्योपेतम्, चौखम्बा विद्याभवन, वाराणसी, संस्करण २०१६
3. महर्षि पाणिनि, पाणिनीयशिक्षा, श्लोक संख्या १३, पृष्ट संख्या १८, व्याख्याकारः शिवराज आचार्य कौण्डिन्न्यायनः, चौखम्बा विद्याभवन, वाराणसी, संस्करण १९९८ ई.
4. पूर्ववत्
5. श्रीमद्भट्टोजिदीक्षितविरचित सिद्धान्तकौमुदी बालमनोरमातत्वबोधिनीटीका सहित कारकान्त प्रथमो भाग, मोतीलाल बनारसीदास दिल्ली, संस्करण २००१, पृष्ट संख्या २४
6. भीमसेन शास्त्री, भैमीव्याख्ययोपेतायां लघुसिद्धान्तकौमुदी, भैमी प्रकाशन ५३७ लाजपतराय मार्केट, दिल्ली, संस्करण २००९, पृष्ट ५२
7. श्रीमद्वरदाराजाचार्यप्रणीतम्, लघुसिद्धान्तकौमुदी, प्रकाशक-गोबिन्दभवन-गीताप्रेस गोरखपुर, संस्करण वि.सं. २०५९ पृष्ट संख्या १२

8. महामहोपाध्यायनागेशभट्टविरचितः लघुशब्देन्दुशेखरः, पञ्चसन्ध्यन्तः सुबोधिनीहिन्दीव्याख्योपेतः, व्याख्याता आचार्य विश्वनाथमिश्रः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, द्वितीय संस्करण २००१
9. श्रीमद्भट्टोजिदीक्षितविरचित सिद्धान्तकौमुदी बालमनोरमातत्वबोधिनीटीका सहित कारकान्त प्रथमो भाग, मोतीलाल बनारसीदास दिल्ली, संस्करण २००१, पृष्ट संख्या २१
10. वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखोल्लासिनी हिन्दी व्याख्या-समन्विता (प्रथमो भागः) व्याख्याकारः श्रीगोविन्दाचार्यः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २०१९।
11. अष्टाध्यायी, महामुनिपाणिनिप्रणीता, शान्ति संस्कृत-हिन्दीव्याख्याविभूषिता, व्याख्याकारः डॉ. नरेश झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी, प्रथम संस्करण २००६।
12. परिभाषेन्दुशेखरः नागेशभट्टविरचितः, सुबोधिनी हिन्दीव्याख्योपेतः, व्याख्याकारः श्री विश्वनाथ मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २०१९।
13. वाक्यपदीयम्, भगवद्भर्तृहरिविरचितम्, तत्कृतया वृत्त्या संवलितम् (प्रथमं ब्रह्मकाण्डम्) विवरणकारः डॉ. शिवशङ्कर अवस्थी, चौखम्बा विद्याभवन, वाराणसी, सस्करण २०१९।
14. वैयाकरणसिद्धान्तकौमुदी, श्रीमद्भट्टोजिदीक्षितविरचिता, बालमनोरमासंस्कृत तथा दीपिकाहिन्दीव्याख्ययोपेता च व्याख्याकारः श्री गोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी संस्करण २००१।
15. काशिकावृत्तिः, श्रीमद्वामन-जयादित्यविरचिता, व्याख्याकारः पं. ईश्वरचन्द्र, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, संस्करण २०१०।